# shrIrAdhAgopAlakavacham

# શ્રીરાધાગોપાલકવચમ્

## Document Information

Text title : shrIrAdhAgopAlakavacham

File name : rAdhAgopAlakavacham.itx

Category : vishhnu, vishnu, kavacha

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 1 newer, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225

Latest update : March 25, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીરાધાગોપાલકવચમ્

શ્રીગણેશાય નમઃ ॥

પાર્વત્યુવાચ ।
કૈલાસશિખરે રમ્યે ગૌરી પૃચ્છતિ શઙ્કરમ્ ।
બ્રહ્માણ્ડાખિલનાથસ્ત્વં સૃષ્ટિસંહારકારકઃ ॥ ૧॥

ત્વમેવ પૂજ્યસે લોકૈર્બ્રહ્મવિષ્ણુસુરાદિભિઃ ।
નિત્યં પઠસિ દેવેશ કસ્ય સ્તોત્રં મહેશ્વર ॥ ૨॥

આશ્ચર્યમિદમત્યન્તં જાયતે મમ શઙ્કર ।
તત્પ્રાણેશ મહાપ્રાજ્ઞ સંશયં છિન્ધિ શઙ્કર ॥ ૩॥

શ્રીમહાદેવ ઉવાચ ।
ધન્યાસિ કૃતપુણ્યાસિ પાર્વતિ પ્રાણવલ્લભે ।
રહસ્યાતિરહસ્યં ચ યત્પૃચ્છસિ વરાનને ॥ ૪॥

સ્ત્રીસ્વભાવાન્મહાદેવિ પુનસ્ત્વં પરિપૃચ્છસિ ।
ગોપનીયં ગોપનીયં ગોપનીયં પ્રયત્નતઃ ॥ ૫॥

દત્તે ચ સિદ્ધિહાનિઃ સ્યાત્તસ્માદ્યત્નેન ગોપયેત્ ।
ઇદં રહસ્યં પરમં પુરુષાર્થપ્રદાયકમ્ ॥ ૬॥

ધનરત્નૌઘમાણિક્યતુરઙ્ગમગજાદિકમ્ ।
દદાતિ સ્મરણાદેવ મહામોક્ષપ્રદાયકમ્ ॥ ૭॥

તત્તેઽહં સમ્પ્રવક્ષ્યામિ શ‍ૃણુષ્વાવહિતા પ્રિયે ।
યોઽસૌ નિરઞ્જનો દેવશ્ચિત્સ્વરૂપી જનાર્દનઃ ॥ ૮॥

સંસારસાગરોત્તારકારણાય સદા નૃણામ્ ।
શ્રીરઙ્ગાદિકરૂપેણ ત્રૈલોક્યં વ્યાપ્ય તિષ્ઠતિ ॥ ૯॥

તતો લોકા મહામૂઢા વિષ્ણુભક્તિવિવર્જિતાઃ ।

નિશ્ચયં નાધિગચ્છન્તિ પુનર્નારાયણો હરિઃ ॥ ૧૦॥

નિરઞ્જનો નિરાકારો ભક્તાનાં પ્રીતિકામદઃ ।
વૃન્દાવનવિહારાય ગોપાલરૂપમુદ્વહન્ ॥ ૧૧॥

મુરલીવાદનાધારી રાધાયૈ પ્રીતિમાવહન્ ।
અંશાંશેભ્યઃ સમુન્મીલ્ય પૂર્ણરૂપકલાયુતઃ ॥ ૧૨॥

શ્રીકૃષ્ણચદ્રો ભગવાન્ નન્દગોપવરોદ્યતઃ ।
ધરણીરૂપિણી માતા યશોદાનન્દદાયિની ॥ ૧૩॥

દ્વાભ્યાં પ્રયાચિતો નાથો દેવક્યાં વસુદેવતઃ ।
બ્રહ્મણાભ્યર્થિતો દેવો દેવૈરપિ સુરેશ્વરિ ॥ ૧૪॥

જાતોઽવન્યાં મુકુન્દોઽપિ મુરલીવેદરેચિકા ।
તયા સાર્ધં વચઃ કૃત્વા તતો જાતો મહીતલે ॥ ૧૫॥

સંસારસારસર્વસ્વં શ્યામલં મહદુજ્જ્વલમ્ ।
એતજ્જ્યોતિરહં વેદ્યં ચિન્તયામિ સનાતનમ્ ॥ ૧૬॥

ગૌરતેજો વિના યસ્તુ શ્યામતેજઃ સમર્ચયેત્ ।
જપેદ્વા ધ્યાયતે વાપિ સ ભવેત્પાતકી શિવે ॥ ૧૭॥

સ બ્રહ્મહા સુરાપી ચ સ્વર્ણસ્તેયી ચ પઞ્ચમઃ ।
એતૈર્દોષૈર્વિલિપ્યેત તેજોભેદાન્મહેશ્વરિ ॥ ૧૮॥

યસ્માજ્જ્યોતિરભૂદ્દ્વેધા રાધામાધવરૂપકમ્ ।
તસ્માદિદં મહાદેવિ ગોપાલેનૈવં શાયિતમ્ ॥ ૧૯॥

દુર્વાસસો મુનેર્મોહે કાર્તિક્યાં રાસમણ્ડલે ।
તતઃ પૃષ્ટવતી રાધા સન્દેહં ભેદમાત્મનઃ ॥ ૨૦॥

નિરઞ્જનાત્સમુત્પન્નં મયાધીતં જગન્મયિ ।
શ્રીકૃષ્ણેન તતઃ પ્રોક્તં રાધાયૈ નારદાય ચ ॥ ૨૧॥

તતો નારદતઃ સર્વં વિરલા વૈષ્ણવાસ્તથા ।
કલૌ જાનન્તિ દેવેશિ ગોપનીયં પ્રયત્નતઃ ॥ ૨૨॥

શઠાય કૃપણાયાથ દામ્ભિકાય સુરેશ્વરિ ।
બ્રહ્મહત્યામવાપ્નોતિ તસ્માદ્યત્નેન ગોપયેત્ ॥ ૨૩॥

ઇતિ શ્રીરાધાગોપાલકવચં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

---

*shrIrAdhAgopAlakavacham*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*